# ७. सप्तमोध्यायः

(१) उक्तप्रकरणत्रयस्य अन्यग्रन्थेषु वैशिष्ठ्यम्।

(२) प्रकरणत्रयस्य ज्योतिषे उपयोगिता

(३) ज्योतिषशास्त्रे उक्तप्रकरणानामवदानम्।

## (1) उक्त प्रकरण त्रयस्य अन्थग्रन्थेषु वैशिष्ठ्यम्

अस्य शोधप्रबन्धस्य यानि प्रकरणानि स्वीकृतानि तानि त्रीणि सन्ति। एतस्य प्रकरणत्रयस्य उपयोगिता महत्वं – वैशिष्ठ्यम् च ज्योतिषस्य होराशास्त्र दृष्ट्या अन्यतमम् वर्तते। यतो हि होराशास्त्रस्य ये ग्रन्था: सन्ति तेष्वऽपि पाराशर होराशास्त्रम् सर्वे ज्योतिर्विद्भि: आधार रूपेण स्वीकृतम् इति, तत: प्रभृति आरभ्य मयहोरा शास्त्रम् यवन होरा शास्त्रम्, वृहज्जतम्, लघुजातम्, जातक शार: सारावलि– जातकपरिजात: – जातकाभरणय् – जातकालंकार – भावुकुलहलम् – फलितविचार: – ताणिकशास्त्रम् – प्रश्नतन्त्रम् – इत्यादय: ये ग्रन्था: सन्ति तेषु या पद्धति: फलकथनस्य निर्दिष्टा स्वीकृता चा वर्तते तदतिरिक्तरूपेण एतेषु प्रकरणेषु शैली प्रयुक्ता वर्तते। यथा –

अन्येषु ग्रन्थेषु फलकथन विषये अनुक्रमेण फलं वर्णितम् अस्ति। किन्तु अस्मिन् प्रकरणत्रये मानवानां यद् आवश्यकम् तदैव स्वीकृतम्। प्रकरणत्रयाणां क्रमानुसारेण वैशिष्ट्याधारेण विवेचनमत्र प्रस्तूयते –

**(1) प्रथमं प्रकरणम् षड्वर्गफलम्**

प्रबन्धेऽस्मिन् प्राथम्येन षड्वर्ग फलम् गृहीतम्

अस्य विषय:– षड्वर्गाणां होरा – द्रेष्काण – नवमांश – द्वादशांसा – सप्तमांश – त्रिशांश इत्यादिनां फलविवेचनम् अस्ति।

(क) ज्योतिषस्य प्रायेण सर्वेषु ग्रन्थेषु (होराशास्त्रस्य) पाराशर – मानसागरी– इत्यादिकं विहाय षड्वर्गस्य एतादृशम् फलम् अनुपलब्धं इति।

(ख) अस्यभाषा अतीवसरला – सुबोधा– सहजा च वर्तते।

(ग) षड्वर्गस्य प्रधान विषयस्य आधारीकृत्य विवेचितम् इति।

(घ) अन्येषु ग्रन्थेषु प्रायेण षड्वर्ग निस्सारण विधि: परिलक्षित: परन्तु विस्तरेण फलकथनाभाव: अत्र विधि: न कथित: अपितु फलकथितमिति।

**द्वितीय प्रकरणम्**

होराशास्त्रे कर्म विपाकादि फलम्

द्वितीय प्रकरणे कर्मविपाकफलं ग्रन्थकारेण वर्णितम् होराशास्त्रस्य ये के चित् प्रामाणिक ग्रन्थाः सन्ति , तेषु ग्रन्थेषु इदं फलं नैव प्राप्यते। एतद् वैशिष्ठयम् इदं अस्ति -

(क) अत्र पूर्वजन्मकृत पापादिनां कारणेन इह जन्मनि अवाञ्छितम् फलम् एतद् वर्तते इति निर्दिष्टम्

(ख) अस्मिन् प्रकरणे प्रश्नकुण्डल्याधारेण - जन्मकुण्डल्याधारेण च फलकथने सुकरं इति।

(ग) अत्र कर्मविपाक फलं ग्रहाधारेण उद्घाटितम् तवाऽपि अतीव सूक्ष्मेक्षिकया चिन्तनम् कृतम्।

(घ) ज्योतिषस्य फलबोधकग्रन्थेषु पूर्वजन्मकृतम् पापम् इत्याधारीकृत्य फलं प्राप्यते, अत्र कानि-कानि कर्माणि कृतानि इत्यापि निर्दिष्टानि, तत् कारणैः अस्मिन जन्मनि सुखावः सन्ताना भावः, लक्ष्म्याभावश्च इति कथितः।

(ङ) अत्र संख्यातम्काः श्लोकाः वर्तते। एतेषु श्लोकेषु जीवनस्य कथं काठिन्यं जातम् इत्यपि निर्दिष्टम्। अस्याऽपि भाषा सरला-सहजा - सुबोधा च वर्तते।

## (3) तृतीयं प्रकरणम् -

मेषादि लग्नानां फलकथनं इति तृतीयप्रकरण रूपेण स्वीकृतम्।

त्रिषु प्रकरणेषु इदं वृहत्तरं वर्तते। होराशास्त्रस्य प्रायेण सर्वेषु ग्रन्थेषु द्वादशलग्नानां फलं प्राप्यते।

अस्य वैशिष्ठ्यानि इमानि सन्ति

(क) अस्य प्रकरणस्य फलाधारः प्रश्नकुण्डली वर्तते। अन्येषु च जन्माधारः स्वीकृतः।

(ख) अस्य मेषतः आरभ्य मीन पर्यन्तम् सांगोपाङ्गम् फलम् वर्णितम्। तत् तु संचितकर्मफल सम्बन्धि वर्तते।

(ग) अस्मिन्नापि ग्रहप्रधानरूपेण भावफलम् उद्घाटितम् तत्राऽपि परस्पर

ग्रहाणां दृष्टि इत्यादिकं नैवनिदृष्टम्।

(घ) संचितकर्म फलाधारेणाऽपि जीवनस्यास्य सम्पूर्ण फलं प्राप्तुं शक्यते। एतदस्य वैशिष्टयम् इति।

(ङ) अस्य प्रकरणस्य अन्यतमं वैशिष्टयम् इतमस्ति यत् संचितकर्माधारेण यत्फलं सम्प्रति प्राप्यते तत् तु अवाच्छितम् स्यात् चेत् तन्निराकरमापि कथं, केनविधिना किं कृत्वा, कियत् कृत्वा, कति कृत्वा, कोपाय: इत्यादिनां सर्वेषां समाधानमपि अत्र उपलभ्यते।

**निष्कर्ष:-**

अस्मिन् शोधप्रबन्धे प्रकरणत्रयस्य यदाधारीकृत्या कार्यं जातम् तद्वैशिष्टयम् इदमेव वर्तते यत् एकस्मिनमेवस्थले, एकस्मिन्नेवपुस्तके ज्योतिर्विदांकृते ज्योतिषरसिक हृदयानां च कृते च प्राप्यते फलमिति।

यदघत्वे वैज्ञानिक युगे समयाभावे च सर्वै: अपेक्ष्यते। इदं प्रकरणत्रयम् ज्ञानभास्करोक्तस्य अनेकेषु प्रकरणेषु अन्यतमं वर्तते। इति संचिन्त्यैवमया सोधकार्य विषयकं स्वीकृतमिति। यदि एतेषां प्रकरणानां यदाप्रकाशनम् व्याख्यासहितम् भवेत् तदास्य वैशिष्ट्यम् स्वत: फलरूपेण ज्योतिष जगति सर्वै: वोधगम्यं भविष्यति। एतद् रत्म् हस्तलिखितमासीत् सोधकार्येण अस्य विदुषांमध्ये प्रकाशनं उपलब्धि च भवेदिति आशया कर्यं जातम् अत्र।

**(2) प्रकरण त्रयस्य ज्योतिषे उपयोगिता**

विश्वस्मिन् अनेका: भाषा सन्ति। परन्तु सर्वाषु भाषासु सर्वेषां विषयानां तथा च विश्वस्य सर्वेषां रहस्यानां ज्ञानं न भवितुं मर्हति। काचित् भाषा एतादृशी अस्ति यस्यां विश्वस्य रहस्यं तत्वं ज्ञानं च विद्यते। ताषु संस्कृत भाषा अन्यतमा वर्तते। संस्कृतेऽपि अनेकानि शास्त्राणि निहितानि सन्ति। तेषु शास्त्रेवुष्वऽपि कानि चित् शास्त्राणि एताहशानि सन्ति एषां साक्षात् रूपेण समाजस्य मनुष्यजीवनस्य च

सम्बन्ध वर्तते। तानि सन्ति धर्मशास्त्रम् – मानवशास्त्राम् – दर्शनशास्त्रम् – ज्योतिषशास्त्रम् चेति। एतेषु ज्योतिषम् साक्षात् रूपेण जन्मतः मृत्युपर्यन्तम् मनुष्यजीवने वर्तते।

यतोऽहि भारतीय दृष्ट्यानुसारेण कदाजातः, कथं जातं, केन प्रकारेण भविष्यति, को दृशं च जीवनंम्, कतिधा जीवनम्, जीवनान्ते किम्। एतेषां प्रश्नानां समाधानं ज्योतिषे निहितम्। अन्यत् शास्त्रम् तु पश्चादेव आगमिष्यति। अनेन कारणेन ज्योतिषं प्रत्यक्षशास्त्ररूपेण स्वीकृयते।

ज्योतिष अनेके विषयाः सन्ति। तत् –तत् सम्बन्धीनि अनेकानि प्रकरणानि सन्ति। अस्य शास्त्रस्य मुख्यतत्वरूपेण कालः स्वीक्रियते। कालेष्वऽपि अनेके भेदाः सन्ति। कालदृष्ट्या ज्योतिषस्य निरूपणम् वैज्ञानिकं अपि सम्भवमस्ति। ज्योतिषेऽपि अनेकविधा मनुष्याणां प्रकृतिश्च अध्ययनं भवति। यदा प्रकृतेः अध्ययनं क्रियते तदा ग्रहाणां ग्रहचारादिरूपेण विवरणम् अध्ययनं च उपलभ्यते, अस्यैव नाम खगोलशास्त्ररूपेण भवति। यदा मानवजीवनस्य सर्वेषां पक्षाणां अध्ययनं क्रियते तस्यनाम ज्योतिषस्य होराशास्त्रम् अस्ति। अनेन कारणेन मानव जीवनस्य साक्षात् सम्बन्धः ज्योतिषस्य अस्ति।

मानव जीवनस्य अध्ययने ज्योतिषस्य ये–स्कन्धाः आवश्यकाः सन्ति ते एव अत्र अनुसन्धाने स्वीकृताः सन्ति। वस्तुतस्तु ज्योतिष शास्त्रस्य अनेकानि प्रकरणानि उपयोगी रूपेण स्वीकृतानि सन्ति। परन्तु हस्त लिखितग्रन्थेषु ज्ञानभास्करः अतीव ज्योतिषस्य सुसम्बन्धं वर्तते। तत्राऽपि प्रकरणत्रयम् आवश्यकंइति।

## (२) षड्वर्ग प्रकरणस्य उपयोगिता

यथा पूर्वेव लिखितम् यत् ग्रहाणां राशिणां च आधारेण जातकस्य सर्वाङ्ग विवेचने षड्वर्गस्य मूलाधारः अस्ति। अद्यावधि ज्योतिषस्य प्रकाशितग्रन्थेषु षड्वर्ग निरूपणम् तु अस्ति। परंतु तस्य फलाभावः प्रायेण दृश्यते। यत्र कुत्राऽपि येन केन ग्रन्थकारेण अस्य फलं गिनदितम्, सामान्य रूपेण कथितम् तथा च भावफलं अपि कथितंम् परं च ज्ञानभास्करोक्तस्य षड्वर्गफले यन्तिरूपणम् प्राप्यते तन्निरूपणं अन्यत्र दुस्करमिति। सम्प्रति विपश्चितानां कृते एतत् षड्वर्ग फलम् अतीव

उपयोगि भवेदिति प्रतीयते। यतोऽहि षोडशादि वर्गाणां यत् फलकथनं अत्र सूक्ष्मेक्षिकया ग्रन्थकारेण श्लोक वद्धेन कृतम् । तत् व्याख्या सहितम् अत्र प्रस्तुतं अस्ति। अनेन षड्वर्ग फलकथनेन सम्प्रति उत्पन्नानां रोगाणां विपत्तिनां च फलकथने अस्य षड्वर्गस्य सहाय्यम् प्राप्तम् भवेष्यिति इति।

(2) होराशास्त्रे कर्मविपाकादि फलकथनम् (द्वितीय प्रकरणमं)

ज्ञानभास्करोक्तस्य प्रकरणस्यास्य अतीव महतवं वर्तते अपि च यस्य कस्याऽपि जन्मादिविवरणाभावः स्यात् तत् फलमापि अनेन कर्तुं शक्यते। अस्यैव नाम कर्म विपाक जन्यदोषाः सन्ति। एतेभ्यः दोषेभ्यः संचरित जीवने अनेकाः व्याधयाः आधयः उपावयाश्च भवन्ति। तन्निवारेण तत् ज्ञाने च अस्य प्रकरणस्य महती आवश्यकता विद्यते ज्योतिषं जन्मकुण्डल्यां चलित कुण्डल्यां, प्रश्नकुण्डल्यां च ये प्रश्नाः समुद्भवन्ति तेषां प्रश्नानां शास्त्राधारीकृत्य समाधानं अत्र प्राप्यते। ग्रन्थकारेण श्लोकबद्धरूपेण कर्मविपाक फलकथनं कृतम्। अद्यावधि अस्य व्याख्या नैव सञ्जाता। अस्मिन् सोध प्रबन्धे व्याख्या सहितं इदं प्रकरणं प्रस्तुतं इति। अन्या व्याख्यया ज्योतिर्विदां कृते अपि च सामान्य ज्योतिषज्ञानां कृते च महद् उपकारो भविष्यति।

यतो हि तत्र त्रीणे कारणानि सन्ति।

(1) अस्मिन् प्रकरणे समस्यानां उद्भव कारणानि कथितानि।

(2) तदापत्तीनां निराकरणं अपि समासेन निगदितम् ।

(3) जन्मशारांशभावेऽपि कर्म विपाक फलकथनं अत्र प्राप्यते।

ज्योतिष ग्रन्थेष्वऽपि एतानि फलानि प्राप्तव्यानि परन्तु अनेकैः महर्षिभिः ग्रन्थकारैश्च कर्मविपाक फलकथने मतैक्यम् नास्ति। अस्मिन् प्रकरणे तु अध्ययनेन प्रतीयते यत् फलं, यत् विवरणम् ग्रन्थकारेण उद्घाटितम् तत् फलम् अन्यत्र दूर्लभम् इति।

अद्यत्वे ज्योतिष विद्भि यत् कार्यं क्रिये तत तु सम्यग् रूपेण असंदिग्ध रूपेण ग्रन्थकाराणां आचार्याणां च आधारः नैव उद्घाट्यते। एतेषां कृते एतत् कर्मविपाक फल विवरणम् अतीव सहायकं भवेदिति।

(3) मेषादि द्वादशलग्नानां फलकथनम् (तृतीयं प्रकरण)

(इत्यस्य उपयोगित)

प्रकरणे अस्मिन् ३५९ संख्याकाः श्लोकाः सन्ति प्रायेण ग्रन्थकारेण सूर्यारूप

HANSA MEHTA LIBRARY

संवादमाध्यमेन द्वादशलग्नानां फलम् नीर्णितम्। अस्य वैशिष्ठयम् इदं अस्ति यत् सम्पूर्ण फलम् प्रश्नकुण्डल्याधारेणैव विवेचितम्। ये दैवज्ञा सन्ति तेषां प्रश्नकुण्डल्याः फलकथने अतीव सन्देहा अवसतः भवति। अपि च कथं प्रश्नकुण्डली निर्माणं भवेत् करणीयं च इत्यस्याऽपि अत्र पद्धति निरूपणं अपि प्राप्यते। अनया पद्धत्या फलकथनं सुकरं भवति। प्रश्नकुण्डली निर्माणस्य लधारेपि लघु पद्धति अत्र कथिता। तथा च मेष लग्नतः मीन पर्यन्तम् लग्नफल कथनस्य अतीव रूचिरा पद्धतिरूपेण अत्र प्रकरणऽस्मिन् उपलभ्यते।

फलम्

मेषादि लग्नानां फलं तु अन्येषु प्रकाशित ग्रन्थेषु प्राप्यते तत्र यत् फलं प्रकटितम् तत् फलं अन्यदस्ति। अनेन ग्रन्थकारेण यत् कथितम् तदनुभव अनुसारेण तथा च पूर्वाचार प्रकटित फलानुचारेण च उभयरूपेण आधारी कृत्य फलोदयः कृतः।

येषु मेषादि लग्नेषु जातकस्य पूर्वजन्मनि किं शरीरं, कुत्र प्राप्तम्, कथं प्राप्तं किं कृतम् चोरी इत्येषामपि उद्भव प्रश्नानां समाधानं ऐतिहरूपेण भौगोलिक दृष्ट्या च कर्माणुवन्धनं अपि अत्र प्रकटितम्। अस्य प्रकणस्याऽपि व्याख्याभावः आसीत्। एतत दृष्ट्वा ज्योतिर्विदां कृते प्रकटमिदम सरभाव सहितं अत्र प्रस्तुतं इति।

अनेन प्रकारेण प्रकरणत्रयस्य ज्योतिष शास्त्रस्य किं च दैवज्ञानां कृते च महती उपयोगिता सिध्यति इति।

## (3) ज्योतिषशास्त्रे उक्तप्रकरणानामवदानम्

यथोक्तम् पूर्वमेव प्रत्यक्षं ज्योतिषं इति उक्त्यानुसारेण ज्योतिषिम् हि मानव जीवने उपयोगी शास्त्रारूपेण काल निर्देश रूपेण अतीतादी कालत्रय ज्ञानरूपेण च स्वीकृयते। सम्प्रति अखिल विश्वस्मिन् मार्ग निर्देशरूपेण उद्देश्य प्राप्ती हेतुश्च इदं शास्त्रम् अनुसरन्ति जनैः। अतो हि ज्योतिषं उभयरूपेण सहाव्यम् भवति। अद्यतना विद्वांशः ज्योतिषस्य उभयरूपेण सहाख्यम् भवति। अद्यतना विद्वांशः ज्योतिषस्य विज्ञान- रूपेणाऽपि स्वीकृयन्ते। विभिन्न प्रकृत्यापत विषये जीवनस्य

विविध घटनादुर्घटना विषये च अस्य उपयोगित्वम् सिद्धयति। अस्य शास्त्रस्य नूतना दृष्टिरूपेण तथा च फलकथने सुकर पद्धति रूपेण च प्रकरणत्रयासस्य योगदानं अवगम्यते। यतो हि इमानि प्रकरणानि।

फलकथन विषये व्याख्यारूपाणि सवैषांकृते व्याख्यारूपाणि सर्वेषांकृते सहायरूपेण असन्दिग्धं सिध्यति। तत्र उदाह्यन्ते यथा –

ज्योतिषे फलकथने होराशास्त्रास्य अनेकानि पुस्तकानि प्रसिद्धानि सन्ति। एतेन फलकथनावसरे सन्देहावसराः जायन्ते। एतैः प्रकरणैः माध्यमेन असंदीग्धरूपेण कथयितुं शक्यते।

कारणानि –

(1) एतेषु प्रकरणेषु सर्वेषां आचार्याणां पूर्वोक्तानां सारांश रूपेण अत्र नित्र दितम्।

(2) कर्मविपाकादि फलकथने अत्यल्पानि पुस्तकानि प्राप्यन्ते। अनेन प्रकरणेन कर्मविपाकादि फलकथने सौकर्यं भवेत्।

(3) प्रकरणत्रयस्य भाषातीव सरला–सुबोधा – प्राणाणिक च विद्यते।

(4) होराशास्त्रे उक्त प्रकरणत्रयाणां नुतनम् फलमपि भवेदिति।

(5) संचित कर्मफल विषये मेषादि द्वादश लग्नानां यत् फलं अत्रोपलभ्यते तत् फलम् अन्यत्र दूर्लभामिति।

अनेन ज्ञायते प्रतीयते च यत् अस्य शोध प्रबन्धस्य केन्द्र विन्दुरूपेण प्रकरणत्रयेण सहितेन सह कारणेन ज्योतिषे अमूल्यं अवदानं भविष्यति इति।

**निष्कर्ष :–** समासेनात्र प्रस्तुयतेऽत्र प्रकरणत्रयस्य योगदान विषये यत् आधुनिक ज्योतिविदुषां कृते ज्योतिषे रसिकानांच कृते अस्य फलकथने आधार रूपेण भवेत्। यतो हि सम्प्रतिकाले कस्यचिदपि पार्श्वे समयः नास्ति अध्ययनस्य कृते। तर्हि नैकोमुयिस्य वचो प्रमाणं इत्यस्य का कथा अनेन अतीव सूक्ष्मक्षिकया ग्रन्थकारेण प्रकरणत्रये यद् आवश्यकम् (फल विषये) तदेव सन्निविष्टं इति।